Title मालासंस्कारः

Author

Extent ३ पत्र Age

Subject तन्त्र

मालासंस्कारः

नं॰ १३०।

नं॰ २२०९ के
मालासंस्कार
रूपकारी
तन्नोम्

नं॰ ~~१५८~~ १५२

मालासंस्कार

5761

F – 3

Complete

१३०२

अथमालासंस्कारः कार्यो मम संभवे सूत्रं धर्मकामार्थमो
क्षदं तत्रविप्रैंद्रकार्याभिर्निर्मितं च सुशोभनं सर्वेषामे
ववर्णानां रक्षकं सर्वेप्सितप्रदं त्रिगुणं त्रिगुणीकृत्य ग्रथ
येत् कुलपशात्ततः ग्रथयित्वा पुरो मालां ततः संस्कारमाच
रेत् मुखे मुखं तत्संयोज्य पुच्छे पुच्छं तु योजयेत् एवं निर्मा
य मालां च शोधयेन्मन्त्रनिसत्तम क्षालयेत्पंचगव्येन सद्यो
जातेन तन्मन्त्रैः मंत्रं यथा सद्योजातं प्रपद्यामि सद्योजा

नायवैनमः भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः
इतिपंचगव्येनक्षालयेत् अश्वत्थपत्रपद्मोपरिनामालिख्य
क्षाल्य स्थापयेत् चंदनागुरुगंधाद्यैर्वामदेवेनचर्चयेत्
ॐनमोवामदेवाय ॐनमोज्येष्ठाय ॐनमोरुद्राय ॐनमः
कालाय ॐनमःकलविकरणाय ॐनमोवलविकरणाय
ॐनमोवलप्रमथनाय ॐनमःसर्वभूतदमनाय ॐनमःम
नोन्मनायनमः धूपयेन्नामघोरेण ॐअघोरेभ्योथघोरे

मा० भ्योघोरघोरतरेभ्यश्च सर्वतःसर्वसर्वेभ्योनमस्तेस्तु।
२ रुद्ररूपेभ्यः लेपयेत्तत्पुरुषेणतु ॐतत्पुरुषायविद्म
हे महादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ३ मंत्रेये
नपंचमेनैवप्रत्येकंचशांतंशांत ॐईशानःसर्वविद्याना
मीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिः ब्रह्मा
शिवोमेस्तुसदाशिवों स्वमेकंपंचमेनैवततोमंत्रेणमंत्र।
येत् ततोमातृकयाःप्राणान्प्रतिष्ठापयेत् मायाबीजादिकं

कृत्वा रक्तपुष्पैः प्रपूजयेत् मातृकाभिस्त्रयोदशकैः रक्त
पुष्पैः प्रपूजयेत् अनेनैव रक्तपुष्पं मर्दयेत् मूलमं
त्रेण तां मालां प्रपूजयेद्द्विजसत्तम ततो जपं विधाय अं
गुष्ठाभ्यां मत्तमालां चालयेन्मध्यमाग्रतः अंगुष्ठाकृ
ष्टी मध्यमायां जपेत्सुधीः अंगुष्ठनामिकाभ्यां वज
पेद्धर्मकर्मणि माले माले महामाले सर्वशक्तिस्वरू
पिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव अ

त्नमालांचमुद्रांचगुरोरपिनदर्शयेत् इतिमालासं-
स्कारः ॥

3